रामायणमहाभारतयोः आख्यानानां समीक्षात्मकमध्ययनम्

भूमिका –

भारतीयसाहित्यं विश्वस्य प्राचीनतमं साहित्यं वर्तते। अस्मिन् सहस्राब्दितः साहित्यरचना भवितुमर्हति। अनेन कारणेन भारतीयसाहित्यस्य परिदृश्यम् अतीव विशालम्। विश्वस्य सर्वसाहित्ये भारतीयसाहित्यस्य समृद्धतमं स्वरूपं प्राप्यते। भारतीयसाहित्यस्य प्राचीनतायाः साक्ष्यं वेदानां रूपे समुलभ्यते, यत् ईसा पूर्वं पञ्चसहस्राधिकवर्षेभ्यः प्राचीनमस्ति यानि च विश्वमानवस्य प्रथमं काव्यं कथ्यते स्म। चतुर्वेदानाम् अनन्तरं ब्राह्मण-आरण्यक-उपनिषद्साहित्यानां, वेदाङ्गसाहित्यस्यादीनां निर्माणमभवत्, यत् मानवजीवनाय आवश्यकं ज्ञान-कर्म-पुरुषार्थचतुष्टैश्च परिपूर्णोऽस्ति। एषामनन्तरं बाल्मीकिकृतं रामायणं, व्यासकृतं महाभारतम्, पुराणसाहित्यस्य च रचना सम्भूता, याभिः अद्यापि भारतीयसाहित्यं समुल्लसितोऽस्ति। एतान्यतिरिक्तं पाणिनि-कात्यायन-पतञ्जलीनां सदृशानां त्रिमुनीनां व्याकरणशास्त्रं, चाणक्यकृतम् अर्थशास्त्रं, चरकसुश्रुतादीनाम् आयुर्वेदग्रन्थानि, विभिन्नानि च दार्शिनिकग्रन्थान्यपि भारतीयसाहित्यं समृद्धञ्चक्रुः।

पूर्वाचार्यैरुल्लिखातासु गद्यपद्यविधासु इतिहाससम्मते कथानके आधारिता आख्यान विधाऽपि प्राचीनकालात् वर्तमानपर्यन्तं भारतीयसाहित्ये प्रचलिताऽस्ति।

शोधसमस्या -

साहित्ये विद्यमानानाम् आख्यानानां विषयम् आलोच्यते चेत् भारतीय साहित्ये आख्यानानामपि उन्मोचनं भवेत्। अतः उक्त समस्यायाः समाधानहेतु शोधाध्ययनस्य विषयः "**रामायणमहाभारतयोः आख्यानानां समीक्षात्मकमध्ययनम् "इति स्वीकृतः।**

शोध परिकल्पना -

प्राक्कल्पना शोधस्य एकम् आधारभूतं तत्वं भवति। भारतीय साहित्ये अन्तर्गतायाम् आख्यानानां विषयं वर्तमान समये प्रासङ्गिकतायाः समन्वयः वर्तते।इति प्रस्तुतस्य शोधविषयस्य प्राक्कल्पना वर्तते। अयं विचारः अनुसन्धान दृष्ट्या शोधप्रवन्धे प्रमाणी क्रियते।

शोधोद्देश्यम् –

साहित्यं समाजस्य दर्पण: भवति। वैदिककालादेव मानव समुदायस्य रुचि: साहित्ये वर्त्तते ।साहित्यविषयं यावदालोच्यते तस्मिन् विषये स्पष्टता तावत् भवति। आख्यान विषये सर्वेषां रुचिः वर्त्तते। संस्कृतबाङ्मये वैदिकसाहित्यात् आधुनिकसाहित्यं पर्यन्तम् आख्यान विषये बहु अध्ययनं न कृतम्। वैदिकवाङ्मये चर्चा अभवत्, वैदिकोत्तर वाङ्मये अपि चर्चा अभवत्।अपि तु लौकिक वाङ्मये

आधुनिक वाङ्मये च आलोचना अभवत् । परन्तु आख्यान विषये विशिष्टं किमपि नास्ति। अहमत्र वैदिक साहित्यात् आधुनिकसाहित्य पर्यन्तं आख्यानस्य महत्वम्, आख्यानस्य आलोचना कृत्वा किं किं आख्यानम् उपलब्धमिति चर्चा कर्तुमिच्छामि। न मात्रम् आशासे अपि तु पूर्णविश्वासेन, यत् अयस्कानां वयस्कानां वालानां तरुणानां किशोराणां प्रौढादीनां सर्वस्तरीयाणां पाठकवृन्दानां कृते प्रवन्धः अयं सुवोध्यः रुचिकरः मनोनीतः च सेत्स्यति। आख्यानस्य विषयं सीकृत्य पठतांछात्राणां आख्यानविषये ज्ञास्यन्ति। मया अस्मिन शोधप्रवन्धे आख्यान वर्तमान समये प्रासङ्गिकतायाः आलोचना करिष्यते । तेन न केवलं सुधीजनाः अपि तु साधारणछात्रा: सामान्य पाठकाश्च अपि लाभान्विता: भविष्यन्ति। नवीनसंस्कृतप्रियजनाः आख्यानविषये परिचिताः भवेयुः इति। अस्य शोधस्य उद्देश्यः भवति।

आख्यानस्य परिचयः –

अस्यां पृथिव्यां मानवसभ्यतायाः आरम्भकालादेव लब्धप्रसवं कविप्रतिभाया अमृतमयं फलं भवति साहित्यम्। कारणं हि साहित्यं मानवस्य प्रतिफलनं दर्पणं वा। कविवाङ्मयसृष्ट्यात्मकस्य तस्य साहित्यस्य रूपद्वयं वर्तते। यत्तस्य सार्वजनीनम् अतीवान्तरं रूपं तत्तु प्रायेणापरिवर्तितमेवास्ति। यत् पुनः सामयिकं किञ्चिदिव बहिरङ्गतम्, रूपं तदेव समये समये प्रदेशे प्रदेशे च विवर्तते। सामाजिकी स्थितिः शिक्षाभ्यासंस्कारादिजन्या कवेर्मानसिकी प्रवृत्तिः साहित्यिकानन्दम् उत्पादयितुम् अलम्। एतेन सहृदयानां मानसिकरुचिरपि अभिव्यक्ता भवति। तामेव स्थितिमनुरुन्धाना संस्कृतवाङ्मये प्रवहन्ती साहित्याधारापि कदाचिन्नैकरूपः परिप्राप्यते।

आख्यान हि सभ्यतायाः संस्कृतिः, तदभावे च सभ्यताया विनाशो भवेत्। किन्तु तन्न भवेत् भारतवर्षेऽस्मिन्। भारते आख्यानस्य भाण्डारः अनन्तः। आख्यान साधारणतया केवलं बालकानां कृते इति तु न ध्रुवम्, परं समेषां साधारणजनानां कृतेऽपि आदरणीयाः भवन्ति। गम्भीरविषयान्विबोधयितुं सारल्येनोपस्थापयितुं चास्माभिराख्यानमाश्रियन्ते। अवान्तरप्रयोजननान्यन्यानि सन्त्यपि मनोविनोदनमेव आख्यानस्य मुलमुद्देश्यम्। संस्कृतेतरसाहित्ये अपि प्राचुर्येण आख्यानप्रपञ्चमस्ति।

आख्यानशव्दस्य अर्थः कथा कथनम् वा।"आख्यायते अनेनेति आख्यानम्"। साहित्यदर्पणे आख्यानं 'पुराकथनम्'इति उक्तमस्ति।यथा "पूर्ववृत्तोक्ति आख्यानम्"। ऐतिहासिकघटनानि नीत्वा आख्यानानि निर्मीयन्ते। ऐतिहासिककथा सामाजिकविज्ञानस्य क्षेत्रे प्रस्तुतीकरणस्य एकः रूपरस्ति।उपाख्यान कस्यचित् घटना विशेषस्य रोचकपूर्णः संक्षिप्तं वर्णनं। प्रायः आख्यान-उपाख्यानयोः तादृशः भेदः न क्रियते। परन्तु तेषां भेदं स्पष्टीकर्तुं आचार्यश्रीधरः स्वस्य टीकायामुल्लेखं कृतवान् -"स्वयं दृष्टार्थकथनं प्राहुराख्यानं वुधाः। श्रुतार्थस्य कथनमुपाख्यानम्"। अर्थात् स्वयं दृष्टविषयस्य वर्णनं आख्यानं एवं च श्रुयमानस्य कथा उपाख्यानमिति।संवादसूक्ते

द्वयोःदेवतयोः ऋषयोः वा संभाषणशैल्याः विषयः प्रस्तुतः भवति।

ऐतिहासिक-कथा-सम्बद्धा, नायकोऽत्र वक्ता, उच्छासादिषु विभक्ता, वक्त्रापरवक्त्रपद्यसंयुक्ता, संस्कृतनिष्ठा, स्वल्पपद्यान्विता, स्वचिरतपरकविचरित्तदिसंयुक्ता च। हर्षचरितम् इति उत्तमाख्यायिकायाः निदर्शनम्। कथायां सरसयुक्तं द्रव्यं गद्यलेखकैः एव निर्मितं भवति। अस्मिन् क्षेत्रे केषुचित् स्थानेषु आर्याः,वक्त्रापवक्त्र छन्दाश्च सन्ति। आदौ पद्यं यं नमस्कारात्मकं खलादिचरित्रं च उल्लिखितम्। यथा -कादम्वरी।

संस्कृतसाहित्यं सुप्राचीनं प्रथागतसाहित्यम्। अत्र नास्ति नूतनत्वम्, सृजनशीलता अत्र अकल्पनीया एव इति धारणास्ति जनमनसि। अस्य कारणं भवति विविधाः संस्कृतकृतयः। ऋग्वेदाद् ध्रूपदिसाहित्यमतिक्रम्य वर्तमाने ऊनविंशशतके अपि अधिका रचना प्रथागतसीमा न लङ्घिता। अत्र स्मरणीयं विविधानां आख्यायिककाव्यानां बीजं निहितमस्ति वेदे। वैदिकयज्ञसम्बन्धिनां वीरत्वव्यञ्जकमाहात्म्यकीर्तनात्मानाम् आख्यानोपाख्यानामाधारो भवति वैदिकधर्मः। सुप्राचीनकालादारभ्य वेदोपनिषत्सु विविधाः आख्यायिकाः परिप्राप्यन्ते अस्माभिः। यथा वेदे याज्ञवल्क्यमैत्रेयी-आख्यानम्, यमनचिकेताख्यानञ्चेत्यादि।

रामायणमहाभारतयोः परिचयः

भारतीयाख्यान इतिहासे ऋग्वेदस्य संवादसूक्तानां महत्त्वमधिकमस्ति। वैदिककालानन्तरं भारतीयसाहित्ये लौकिकः युगं प्रारभ्यते।भारतीयज्ञानपरम्परायां काव्यं लक्षणानि शास्त्रं रूपेण निवन्धस्य कार्यं विशिष्टत्वेन संस्कृतभाषायामेव अभूत्। प्रत्येकः कविः प्रयोगधर्मी भवति।

कःरामायणस्य परिचयः

संस्कृतसाहित्ये रामायणवत् प्रसिद्धः लोकप्रियश्च अन्यो ग्रन्थः नास्तीति वक्तुं शक्यते। रामायणम् रामस्य अयनं अर्थात् चरितं।नीतिदृष्ट्या लोकोपकारकदृष्ट्या च रामायणस्य महत्त्वं वर्धते। रामायण अतिप्रसिद्धं महाकाव्यं वर्तते। रामायणे सप्त काण्डाः पञ्चाधिकं शतं सर्गाः चतुर्विंशतिः सहस्राः श्लोकाः च सन्ति।पितृपुत्रधर्मस्य भ्रातृधर्मस्य पतिपत्नीधर्मस्य एवं च अन्यकौटुम्विकधर्मस्य च आदर्शभूतो अयं ग्रन्थः। अयं ग्रन्थस्य कर्ता श्रीमद्वाल्मीकिः।

तमसा नदीं स्नानार्थं गच्छन् ऋषिः वाल्मीकिः व्याधेन मारितः क्रोञ्चं दृष्टवान्।तदा शोकाकुलः सः व्याधं प्रति इति शापितवान्-

" मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः

यत्कौञ्चमिथुनादेकमवधीः काममोहितम् "।

एतत् परं नारदः मुखात् रामस्य वृत्तान्तं श्रुत्वा सः रामायणं रचितवान्। सीतारामयोः वियोगः रामायणस्य मुख्यं कथा। रामायणस्य प्रतिसहस्रतमस्य श्लोकस्य आदौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते। अत्र रामचन्द्रस्य धर्मनिष्टा, सीतायाः सरलता, भरतस्य भातृभक्तिः, लक्ष्मणस्य कर्तव्यनिष्टा,हनुमतः कार्यदक्षता, सुग्रीवस्य सौहार्दभावः, विभीषणस्य धर्मपरायणता इत्यादयः विषयाः सन्ति। रामायणे सर्वेषु काण्डेषु अतिप्रसिद्धाः घटनाः वर्तन्ते। यथा वालकाण्डे रामस्य जन्म कथा, विश्वामित्रस्य यागरक्षा, सीतायाः परिणयः इत्यादयः वर्णितम्। अयोध्याकाण्डे रामस्य राज्याभिषेकस्य प्रस्तुति, कैकेयीकृतःविघ्नः, दशरथमरणम् इत्यादि। अरण्यकाण्डे रामस्य दण्डकारण्यप्रवेशः शूर्पणखायाः अंगच्छेदः, सीतापहरणं, रामस्य दुःखं च।किष्किन्धाकाण्डे रामसुग्रीवसंवादः,वालिवधं,सीतान्वेषणं च। सुन्दरकाण्डे लङ्कावर्णनं, सीतायाः दर्शनम्, युद्धकाण्डे रामरावणयुद्धं, राक्षसानां हननं,लङ्काजयः, उत्तरकाण्डे सीतापवादश्रुतिः, सीतापरित्यागः, वाल्मीकिः आश्रमे लवकुशयोः जन्मः च रामायणे प्रतिपाद्यविषयाः।

वाल्मीकिरामायणस्य प्रथमान्तिमकाण्डयोः रचयिता वाल्मीकिः आसीत् इति विषये सन्देहः वर्तते। तथापि एतौ द्वौ काण्डौ रामायणस्य अविभाज्यौ अङ्गौ, इति सर्वे जानीमः।

खः महाभारतस्य परिचयः

महाभारत भारतस्य प्रमुखः काव्यग्रन्थः अस्ति। ग्रन्थोऽयं इतिहासवर्गे आगच्छति। ग्रन्थोऽयं भारतस्य अद्वितीयः धार्मिकः ऐतिहासिकः दार्शनिकः च ग्रन्थः अस्ति। ग्रन्थोऽयं हिन्दुधर्मस्य पञ्चमवेदः इति मन्यते। महाभारतस्य मुख्यघटना कौरवपाण्डवयोः युद्धमस्ति। महाभारतस्य उत्तमाभागा श्रीमद्भागवतगीता यस्मिन् श्रीकृष्णः अर्जुनाय अस्य जीवनस्य सम्पूर्णं दर्शनम् ददाति। महाभारतं श्रीकृष्णद्वैपायनवेदव्यासः वर्षत्रयं यावत् अधिकश्रमेण रचितवान्।

"त्रिभीर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः

महाभारतमाख्यानं कृतवानिदमद्भुतम्"।

महाभारत १८पर्वाणि सन्ति।प्रत्येकेषु पर्वेषु विस्तृतघटनाः वर्तन्ते।ते यथा चन्द्रः वंशस्य वर्णनं, कौरवपाण्डवानां उत्पत्तिः इत्यादयः आदिपर्वे प्राप्यन्ते।सभापर्वे दूतं कुर्वन्,वनपर्वे पाण्डवाः १२वर्षाणि वनं स्थित्वा विराटपर्वे मत्स्यः राज्ये गुप्तरूपेण स्थितवन्तः। अतःपरं उद्योगपर्वे श्रीकृष्णः दूतरूपेण कौरवानां समीप सन्धिं प्रस्थावितवान्। भीष्मपर्वे नैतिकशिक्षाभिः परिपूर्णः अस्ति। द्रोणपर्वे द्रोणस्य सेनापतित्व,अभिमन्युवधस्य च वर्णनं भवति। कर्णपर्वे कर्णस्य सेनापतित्व तस्य वधस्य च वर्णनं भवति। शल्यपर्वे अपि समानं भवति। सौप्तिकपर्वे अश्वत्थामा रात्रौ सुप्तान् द्रौपदीपुत्रान् मारयति।स्त्रीविलापस्य वर्णनं स्त्रीपर्वे अस्ति।शान्ति-अनुशासनपर्वयोः युधिष्ठिरस्य राज्याभिषेकः, भीष्मः युधिष्ठिराय राजधर्मविषये उपदेशं ददाति। अश्वमेधस्य वर्णनमस्ति। गान्धारीधृतराष्ट्रयोः वानप्रस्थाश्रमं गमनस्य वर्णनं आश्रमवासीपर्वे अस्ति। मौसलपर्वे मुसलेन

यादवानां विनाशस्य,लुब्धकवाणप्रहारात् श्रीकृष्णस्य मृत्योः च वर्णनं भवति। महाप्रस्थानिकपर्वे पाण्डवानां राज्यं अर्जुनस्य पौत्रपरिक्षिताय समर्प्य सर्गगमनस्य वर्णनं भवति। स्वर्गारोहणपर्वे पाण्डवाः द्रौपद्या सह स्वर्गं प्राप्नुवन्तः। हरिवंशपुराणे कृष्णस्य वंशः, तस्य जन्मजीवनस्य च विषयः अस्ति।

रामायणे आख्यान परम्परा

भारते उपलभ्यमानेषु साहित्येषु प्राचीनाः वेदाः। आर्षसंस्कारस्य प्रमाणलेख्याः इमे ग्रन्थाः। अतः ऋषीणाम् आख्यानेन प्रकाशिता वेदाः। तत्र प्राचीनो भवति ऋग्वेदः। आख्यानानि उपलभ्यन्ते ऋग्वेदे –

‘तवाहं शूर रातिभिः प्रत्यायं सिन्दुमावदन्

उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः।।’

अन्यत्र आख्यानानि भवन्ति-

‘नराशंस सुधष्टममपश्यं सप्रथस्तमम्।

दिवोन सद्ममखसम्।।

यज्ञं पृच्छाम्यवमं स तद् दूतो वि वोचति....।’

संहितासु आख्यानस्य प्रयोगः दृश्यते। परन्तु अत्र आख्यानसमानार्थीना कथाशब्देन बहुलप्रयोगः दृश्यते।

1. कथा यजमानो यजमानेन मातृव्येन संहऽऽसोत्सहं वेद।

2. यत् समावद्धिदकथा त्वममनिभजोजनोनाहम्।

3. ते ब्रूवनना नरशमनीथा कथा नरशमनोष इति।

4. कथा न क्षोणीभिर्यसा सभारत।

वाल्मीकीये रामायणे कविवाल्मीकिः, आख्यानस्य सम्बन्धकार्यं प्रायः सर्वेस्मिन् काण्डे किञ्चित् किञ्चित् वक्ति। यथा बालकाण्डे अन्धमुनिकर्तृकशापप्रदानाद्याख्यान। किष्किन्धाकाण्डे वर्षावर्णादिकथनम्, सुन्दरकाण्डे सुरसासापिन्याः उद्धारः, युद्धकाण्डे अकम्पन-प्रहस्त-धुम्रलोचन-वज्रदंष्ट्रादिराक्षसवधाद्याख्यान चेत्यादिविषयाः दृष्टाः। रामायणे सर्वाधिकानि

आख्यानानि बालकाण्डे उत्तरकाण्डे च वर्तन्ते। वामनावताराख्यान, राज्ञः सागरस्य आख्यान, समुद्रमन्थनस्य आख्यान, शुनःशेपाख्यान (बालकाण्डे), श्रवणस्य आख्यान (अयोध्याकाण्डे), हनुमतः आख्यान (किष्किन्धा काण्ड) च इत्यादयः। रामायणीयाख्यान तु मानवीयमूल्यानां प्रतिस्थापनं करोति। आख्यान मनोह्लादरसपरिपूर्णं भवन्ति अतः अत्र पाठकान् आकर्षयतन्ति।

महाभारते आख्यान परम्परा

भारतीयज्ञानपरम्परायां काव्यशास्त्रमेका विशिष्टा विधा वर्तते। भारतीयज्ञानपरम्परायां काव्यलक्षणानि शास्त्ररूपेण निबन्धनस्य कार्यं विशिष्टत्वेन संस्कृतभाषायामेव अभूत्। प्रत्येकं कविः प्रयोगधर्मी भवति। अतः एव कथानकं शैलीं च गृहीत्वापि नूतनां रचनां रचयति। संस्कृतकाव्यं लोकेन शास्त्रेण च समन्वयं कृत्वा काव्यसृष्टिं तस्य प्रवर्धनञ्च विवेचयति।

आख्यानदृष्ट्या मूल्याङ्कनेन अवगम्यते यत् महाभारतं सर्वविधाख्यानानाम् अद्भुतं समागमं वर्तते। वेदोत्तराख्याने पात्रशैल्युद्देश्यादिदृष्ट्या यावन्तः भेदाः भवितुम् अर्हन्ति, तावन्तः प्रकाराः महाभारते अवश्यं प्राप्यन्ते। यथा – शकुन्तलोपाख्यानम् (आदिपर्व), पृथुभरतयोः आख्यान (उद्योगपर्व), शिव्युपाख्यानम्, सावित्र्युपाख्यानम्, नलोपाख्यानम् (वनपर्व), हंसकाकाख्यानम् (शल्यपर्व), स्वयंभूमन्व्योः आख्यान, परशुरामस्य आख्यान (शान्तिपर्व), विश्वमित्रजन्माख्यान (अनुशासनपर्व) च प्रभृतयः। महाभारतं धर्मस्य संस्कृतेश्च परिचायकं वर्तते। महाभारते आख्यानानां बाहुल्यमिदमभिमतं पोषयति यत् महाभारतीयकाले आख्यानस्य महत्त्वपूर्णं स्थानमासीत्।। महाभारते व्यासः स्वपरम्परायाः वंशचरितानुकथनेन आख्यान कथयति। कदाचित फणितात्मकथा इत्यपि विशेषणयुक्ता च अत्र कथा विद्यते। किन्तु अत्र उभयोः रामायणमहाभारतयोः आख्यायशैली काचित् वर्तते। एवमेव आख्यानवर्णनशैली वयम् आधुनिकाख्यायिकायां च दृश्यते। भारतीयसाहित्ये आख्यानस्य विकासः लक्षणीयः अस्ति।

आधुनिकसमाजे रामायणमहाभारतकालीन आख्यानानां समीक्षा -

आख्यान माध्यमेन मनुष्यजीवने परिवर्तनमागच्छति। रामायणमहाभारतकालीन आख्यानानां श्रुत्वा मनुष्यानां सामाजिकः मानसिकः शैक्षिकः नैतिकश्च विकाशं भवन्ति। यथा शुनशेपस्य आख्यानं,अत्र व्रतभङ्गस्य परिमाणं भयंकरः भवति।यस्य प्रमाणं राज्ञः हरिश्चन्द्रस्य उदररोगस्य घटना अस्ति। अतः यदि वयं किमपि प्रतिज्ञां कूर्म्मः , तर्हि तस्य पालनं अस्माकं कर्तव्यमस्ति।अत्र नित्यं भ्रमणकर्तुं उपदेशः चरैवेति इति शब्देन अस्ति। महाभारते पुरुरवा-उर्वशी आख्यान अनेकानि नैतिकानि प्रददाति।स्त्रिया सह आसक्तिं कृत्वा स्वजीवनस्य अपव्ययं न कृतं। सुन्दरैः आकर्षकैः पुरुषैः मोहितः भूत्वा स्वकर्तव्यमुपेक्षा मा कुरु। परोपकारेण सर्वेषां जीवने स्वार्थकता आगच्छति।।

चराचराः इति विभक्तेः जीवगणे अचरजीवाः वृक्षाः उद्बिजाः भवन्ति। चराः तु प्राणिनः

पक्षिणः कीटाः सन्ति। ते जरायुजाः, स्वेदजाः, अण्डजाः च। एतेषु प्राणिषु मानवः बुद्धिमान् जीवी इति ज्ञातोऽयं विषयः। तस्य विवेचनाशक्तिः इतरप्राणिभ्यः मनुष्यमुत्तमं कृता। किं, कदा, कथं वा कर्तव्यमिति विवेचनम्, अनुशासनं, क्रमपालनं, सामाजिकजीवनं च इत्यादयः गुणाः मनुष्यस्य एव सन्ति। कर्तव्याकर्तव्येति विचारिते सति नीतिकथाः, नीतिश्लोकाः च दरीदृश्यन्ते। मानवः इतरेभ्यः कष्टं न यच्छेत्, आनन्दमेव यच्छेत्, स्वयं च सुखी भवेदिति नीतिश्लोकानामाशयः। एवं अनेकाः नीतिकथाः संस्कृतवाङ्मये दृश्यन्ते। नीतिकथासाहित्यं चतुर्थभागेषु विभक्तमस्ति – (क.) अद्भुतकथा, (ख.) लोककथा, (ग.) कल्पितकथा, (घ.) पशुकथा। व्यावहारिकदृष्टिकोणेन संस्कृतसाहित्यं भागद्वये विभक्तमस्ति – (क.) नीतिकथा, (ख.) लोककथा। पंचतन्त्रं हितोपदेशश्चेत्यादयः नीतिकथाः संस्कृतवाङ्मये दृश्यन्ते।

उपसंहारः –

पूर्वाचार्यैः गद्यपद्यविधायाः ये प्रकाराः भणिताः तेषु आख्यान एकं प्रमुखं विधम् अस्ति। इयं विधा प्राचीनकालात् वर्तमानपर्यन्तम् अक्षुण्णं रूपेण प्रचलिताऽस्ति। अस्य लोकप्रियस्य आकलनं पत्रपत्रिकासु प्रकाश्यमानानाम् आख्यानानां संख्याभिः कर्तुं शक्यते। अत्र रमणीयशब्देषु सारगर्भितस्य प्रसङ्गस्य चित्रणं क्रियते। वर्तमाने रूचिपूर्णे समये अस्याः प्रचलनं भारतीयसाहित्ये संवर्द्धन्ते। प्रस्तुत-आख्यान विश्वस्य समस्तासु भाषासु एकस्मिन् प्रतिष्ठिते स्थाने अस्ति। अस्य प्रयोगधर्मितस्य शैल्याम् अन्यासु भाषासु प्रचलितानां विधानां प्रयोगः सर्वोपरि आसीत्। वर्तमानभारतीयसाहित्ये अन्यासु भाषासु आख्यान प्रचलितास्ति। ललितनिबन्धः इति नाम्ना।

विशेषः –उपर्युक्तेषु अध्यायेषु आवश्यकतानुसारं परिवर्तनं सम्भवति।

अध्यायविभाजनम्-

भूमिका

प्रथमोऽध्यायः-आख्यानस्य परिचयः

क.आख्यानस्य परिभाषा

ख.उपाख्यानस्य परिभाषा

ग.संवादस्य परिभाषा

घ.कथाख्यायिकयोः परिभाषा

द्वितीयोऽध्यायः-रामायणमहाभारतयोः परिचयः

क.रामायणस्य परिचयः

ख.महाभारतस्य परिचयः

तृतीयोऽध्यायः-रामायणे आख्यान परम्परा

क.शनःशेप आख्यान

ख.अगस्त्य-लोपामुद्रा आख्यान

ग.समुद्रमन्थन आख्यान

घ.हनुमतः आख्यान

चतुर्थोऽध्यायः-महाभारते आख्यान परम्परा

क.चन्द्रसूर्यराघवः आख्यान

ख.इन्द्र-दधीचि आख्यान

ग.सरमापण्याख्यान

घ.शकुन्तलोपाख्यान

पञ्चमोऽध्यायः-आधुनिकसमाजे रामायणमहाभारतकालीन आख्यानानां समीक्षा

उपसंहारः

सहायकग्रन्थसूची –

• संस्कृत साहित्येर इतिहास- ड: देवकुमार दास,स्वदेश 101वि, विवेकानंद रोड,कलकाता-700006

• आधुनिक काल का संस्कृत गद्य साहित्य, कलानाथ शास्त्री

• आधुनिकसंस्कृतकाव्यपरम्परा, केशवराय मुसलगावरेकरचौखम्बा विद्याभवन, परम्परा, वराणसी - 2004

• भारतीय मिथककोष- ड: ऊषा पुरी विद्यावाचस्पति, नेशनल पब्लिशिंग हाउस, नयी दिल्ली-110002

• ऋग्वेदः, दयानन्दसंस्थान, दिल्ली, 2002

• वाल्मीकिरामायण, सं. रामनारायण दत्त, शास्त्री प्रकाशन, गोरखपुर 2042, वि.सं. 2006

• महाभारत, सं.जी.डी. जालान, गीताप्रेश, गोरखपूर - 2014

. दण्डी- काव्यादर्श भट्टाचार्यी व्यानार्जी, संस्कृत वुक डिपो - कलकाता